योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०५

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

प्रवृत्तिरेव प्रथमं यथाशास्त्रविहारिणाम् ।

प्रभेव वर्णभेदानां साधनी सर्वकर्मणाम् ।। १

मनसा वाञ्छते यच्च यथाशास्त्रं न कर्मणा ।

साध्यते मत्तलीलासौ मोहनी नार्थसाधनी ।। २

यथा संयतते येन तथा तेनानुभूयते ।

स्वकर्मैवेति चास्तेऽन्या व्यतिरिक्ता न दैवदृक् ।। ३

उच्छास्त्रं शास्त्रितं चेति द्विविधं पौरुषं स्मृतम् ।

तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् ।। ४

द्वौ हुडाविव युध्येते पुरुषार्थौ समासमौ ।

प्राक्तनश्चैहिकश्चैव शाम्यत्यत्राल्पवीर्यवान् ।। ५५

अतः पुरुषयत्नेन यतितव्यं यथा तथा ।

पुंसा तन्त्रेण सद्योगाद्येनाश्वद्यतनो जयेत् ।। ६

द्वौ हुडाविव युध्येते पुरुषार्थौ समासमौ ।

आत्मीयश्चान्यदीयश्च जयत्यतिबलस्तयोः ।। ७

अनर्थः प्राप्यते यत्र शास्त्रितादपि पौरुषात् ।

अनर्थकर्तृ बलवत्तत्र ज्ञेयं स्वपौरुषम् ।। ८

परं पौरुषमाश्रित्य दन्तैर्दन्तान्विचूर्णयन् ।

शुभेनाऽशुभमुद्युक्तं प्राक्तनं पौरुषं जयेत् ।। ९

प्राक्तनः पुरुषार्थोऽसौ मां नियोजयतीति धीः ।

बलादधस्पदीकार्या प्रत्यक्षादधिका न सा ।। १०

तावत्तावत्प्रयत्नेन यतितव्यं सुपौरुषम् ।

प्राक्तनं पौरुषं यावदशुभं शाम्यति स्वयम् ।। ११

दोषः शाम्यत्यसंदेहं प्राक्तनोऽद्यतनैर्गुणैः ।

दृष्टान्तोऽत्र ह्यस्तनस्य दोषस्याद्य गुणैः क्षयः ।। १२

असद्दैवमधःकृत्वा नित्यमुद्रिक्तया धिया ।

संसारोत्तरणं भूत्यै यतेताऽऽधातुमात्मनि ।। १३

न गन्तव्यमनुद्योगैः साम्यं पुरुषगर्दभैः ।

उद्योगस्तु यथाशास्त्रं लोकद्वितयसिद्धये ।। १४

संसारकुहरादस्मान्निर्गन्तव्यं स्वयं बलात् ।

पौरुषं यत्नमाश्रित्य हरिणेवारिपञ्जरात् ।। १५

प्रत्यहं प्रत्यवेक्षेत देहं नश्वरमात्मनः ।

संत्यजेत्पशुभिस्तुल्यं श्रयेत्सत्पुरुषोचितम् ।। १६

किंचित्कान्तान्नपानादिकलिलं कोमलं गृहे ।

व्रणे कीट इवास्वाद्य वयः कार्यं न भस्मसात् ।। १७

शुभेन पौरुषेणाशु शुभमासाद्यते फलम् ।

अशुभेनाशुभं नित्यं दैवं नाम न किंचन ।। १८

प्रत्यक्षमानमुत्सृज्य योऽनुमानमुपैत्यसौ ।

स्वभुजाभ्यामिमौ सर्पाविति प्रेक्ष्य पलायते ।। १९

दैवं संप्रेरयति मामिति दग्धधियां मुखम् ।

अदृष्टश्रेष्ठदृष्टीनां दृष्ट्वा लक्ष्मीर्निवर्तते ।। २०

तस्मात्पुरुषयत्नेन विवेकं पूर्वमाश्रयेत् ।

आत्मज्ञानमहार्थानि शास्त्राणि प्रविचारयेत् ।। २१

चित्ते चिन्तयतामर्थं यथाशास्त्रं निजेहितैः ।

असंसाधयतामेव मूढानां धिग्दुरीप्सितम् ।। २२

पौरुषं च नवानन्तं न यत्नमभिवाच्छ्यते ।

न यत्नेनापि महता प्राप्यते रत्नमश्मतः ।। २३

यथा घटः परिमितो यथा परिमितः पटः ।

नियतः परिमाणस्थः पुरुषार्थस्तथैव च ।। २४

स च सच्छास्त्रसत्सङ्गसदाचारैर्निजं फलम् ।

ददातीति स्वभावोऽयमन्यथा नार्थसिद्धये ।। २५

स्वरूपं पौरुषस्यैतदेवं व्यवहरन्नरः ।

याति निष्फलयत्नत्वं न कदाचन कश्चन ।। २६

दैन्यदारिद्र्यदुःखार्ता अप्यन्ये पुरुषोत्तमाः ।

पौरुषेणैव यत्नेन याता देवेन्द्रतुल्यताम् ।। २७

आबाल्यादलमभ्यस्तैः शास्त्रसत्सङ्गमादिभिः ।

गुणैः पुरुषयत्नेन स्वार्थः संप्राप्यते यतः ।। २८

इति प्रत्यक्षतो दृष्टमनुभूतं श्रुतं कृतम् ।

दैवात्तमिति मन्यन्ते ये हतास्ते कुबुद्धयः ।। २९

आलस्यं यदि न भवेज्जगत्यनर्थः

को न स्याद्बहुधनको बहुश्रुतो वा ।

आलस्यादियमवनिः ससागरान्ता

संपूर्णा नरपशुभिश्च निर्धनैश्च ।। ३०

बाल्ये गतेऽविरतकल्पितकेलिलोले

दोर्दण्डमण्डितवयःप्रभृति प्रयत्नात् ।

सत्सङ्गमैः पदपदार्थविशुद्धबुद्धिः

कुर्यान्नरः स्वगुणदोषविचारणानि ।। ३१

वाल्मीकिरुवाच ।

इत्युक्तवत्यथ मुनौ दिवसो जगाम

सायंतनाय विधयेऽस्तमिनो जगाम ।

स्नातुं सभा कृतनमस्करणा जगाम

श्यामाक्षये रविकरेण सहाजगाम ।। ३२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे पौरुषस्थापनं नाम पञ्चमः सर्गः ।। ५ ।।

प्रथमो दिवसः ।